# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College under University of Calcutta)

M.A./M.Sc. SECOND SEMESTER EXAMINATION, MAY 2014

FIRST YEAR

SANSKRIT

Date : 27/5/2014

Time : 11 am – 3 pm

Paper : IV

Full Marks : 100

**[Use a separate Answer Book for each Group]**

## Group – A

1. **एक:** प्रश्न: समाधेय:। [1×10]

क) ''यस्यां पूर्वे पूर्वजना विचक्रिरे'' इति मन्त्रांशो यस्मिन् सूक्ते वर्तते तस्य सूक्तस्य महत्त्वं यथाधीतमालोच्यताम्।

ख) **एकतमस्य** सप्रसङ्गं व्याख्यानं कर्तव्यम्।

i) पूर्ण: कुम्भोऽधि काल आहित–
स्तं वै पश्यामो बहुधा नु सन्त:।
स इमा विश्वा भुवनानि प्रत्यङ्
कालं तमाहु: परमे व्योमन्।।

ii) य: समाम्यो वरुणो यो व्याम्यो
य: सन्देश्यो यो विदेश्य:।
यो दैवो वरुणो यश्च मानुष:।।
तैस्त्वा सर्वेरभि ष्यामि पाशै:।

2. अध:स्थेषु **पञ्चानां** प्रश्नानां सूचीमुखसम्मितमुत्तरं प्रदीयताम्। [5×2]

क) 'पञ्च महायज्ञा:' इति संज्ञा केषाम्?

ख) ब्राह्मणशब्दस्य का व्युत्पत्ति:?

ग) 'ओदपात्रात्' इति पदस्य कोऽर्थ:?

घ) चतुर्थमायुर्भरद्वाजेन किमर्थं प्रार्थितम्? तच्च तेन लब्धं न वा?

ङ) केनोपनिषद: प्रथमखण्डस्य द्वितीये मन्त्रे गुरुणा शिष्यस्य प्रश्नस्य कथं समाधानं कृतम्?

च) किम् इष्टं, पूर्तं च किम्?

छ) यमप्रदत्त: चतुर्थो वर: क:? किमर्थं स: नचिकेतसे प्रदत्त:?

ज) 'देवैरत्रापि विचिकित्सितं पुरा' – इत्यत्र को वक्ता कश्च श्रोता? कुत्र च देवानां विचिकित्सा?

3. यथाकामम् **एकतमस्य** विस्तरश उत्तरं प्रदेयम्। [15]

क) ब्रह्मयज्ञस्य स्वरूपमधीतग्रन्थानुसारत: सम्यगालोच्यताम्।

ख) कठोपनिषत्प्रतिपादितम् आत्मतत्त्वं यथाग्रन्थमुपस्थापयत।

4. **एकतमस्य** प्रश्नस्योत्तरं प्रदेयम्। [15]

क) 'ऋचां त्व: पोषमास्ते पुपुष्वान्–' इति मन्त्र: कस्मिन् प्रसङ्गे भाष्योपक्रमणिकायां समुद्धृत:? कथं चांय मन्त्र: सायणेन व्याख्यात:? मन्त्रेणानेन प्रासङ्गिक: कोऽर्थ: सिध्यति?

ख) षण्णां वेदाङ्गानां मध्ये यथेच्छं त्रयाणां वेदव्याख्यायामुपयोग: प्रदर्श्यताम्।

## Group – B

6. **एकं** सूत्रं व्याख्येयम्। [1×4·5]

क) अनुदात्तङित आत्मनेपदम्।

ख) कृञ्चानुप्रयुज्यते लिटि।

7. **काचन** दीक्षितवृत्तिः व्याख्येया। [1×4·5]

क) येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्।

ख) परत्वान्नित्यत्वाच्च 'अतो येयः' इति प्राञ्चः। यद्यप्यन्तरङ्गत्वात् पररूपं न्याय्यम्, तथापि 'यास्' इत्येतस्य इय् इति व्याख्येयम्।

8. यथेच्छं धातुरूप**द्वितयं** ससूत्रं निष्पादनीयम्। [2×3]

क) भवामि।

ख) बभूव।

ग) एधाञ्चक्रे।

घ) एधिष्ये।

9. अधोनिर्दिष्टेषु यथेच्छं रूप**चतुष्टस्य** सिद्धिः ससूत्रं प्रदर्शनीया। [4×2·5]

क) एधितव्यम्।

ख) वास्तव्यः।

ग) स्नानीयम्।

घ) जेयम्।

ङ) भृत्यः।

च) वाच्यम्।

छ) शक्यम्।

10. अधःस्थेषु स्वाभिमतानां **पञ्चानां** प्रश्नानां सूचीमुखतुल्यमुत्तरं प्रदीयताम्। [5×2]

क) भारोपीयभाषायाम् अनुमिता द्विस्वरध्वनयः लिख्यन्ताम्।

ख) भारोपीयभाषायां कल्पितानां कण्ठ्यध्वनीनां वर्गत्रयं संसूच्य रूपाणि उल्लिख्यन्ताम्।

ग) इ.यु.-भाषायाः विलुप्तं शाखाद्वयं लिख्यताम्।

घ) इ.यु.-भाषायाः कस्यां शाखायाम् आङ्गलभाषा अन्तर्भूता?

ङ) पाश्चात्त्यदेशीयः को नाम भाषातत्त्वविद् येन रूपान्तरमूलकोत्पादनमूलकव्याकरणं प्रणीतम्?

च) वर्णनामूलकभाषाविज्ञानस्य मुख्यं वैशिष्ट्यद्वयं सूच्यताम्।

छ) प्राचीनभारतीयार्यभाषायाः '*a*'-ध्वनिः केषाम् इन्दो-युरोपीयध्वनीनां परिणामः?

ज) प्राचीनभारतीयार्यभाषास्थितस्य '*mātā*' इत्यस्य ग्रीकप्रतिरूपम् आङ्गलप्रतिरूपञ्च निर्दिश्यताम्।

11. अधोलिखितयोः **एकस्य** प्रश्नस्योत्तरं प्रदेयम्। [15]

क) किं नाम ध्वनिसूत्रम्? ग्रासमानसूत्रमुल्लिख्य उदाहरणयोगेन व्याख्यायताम्। अस्मिन् विषये पाणिनीयसूत्रस्य सादृश्यं निरूप्यताम्। [2+9+4]

ख) किं नाम भाषाविज्ञानम्? वर्णनात्मकभाषाविज्ञानस्य वैशिष्ट्यानि लिख्यन्ताम्। [15]